# শ্রী শ্রী ওঙ্কারনাথবৈদিকবিদ্যাপীঠম্

১৪৩১ বঙ্গাব্দস্য বার্ষিকসংস্কৃতপরীক্ষা

বিষয়ঃ – ধর্মশাস্ত্রম্ প্রথমপত্রম্ পূর্ণাঙ্কঃ – ১০০

**১) অত্র পঞ্চবিংশতিঃ প্রশ্নাঃ সন্তি। দ্বিত্রৈঃ বাক্যৈঃ এষু সর্বে প্রশ্নাঃ সমাধেয়াঃ।** **২৫×২ = ৪০**

1. সংস্কারঃ- পদস্য প্রকৃতি-প্রত্যয়ঃ নির্ণীয়তাম্।
2. কঃ আদিকবিঃ? তস্য রচিতম্ অদিকাব্যং কিম্?
3. পুরাণস্য পঞ্চলক্ষণানি কানি?
4. "উপনিষদ্"-শব্দস্য ব্যুৎপত্তিঃ কা।
5. "আহারনিদ্রাভয়মৈথুনাদি সামান্যমেতদ্ পশুভির্নরাণাম্।
   ধর্মো হি তেষামধিকো বিশেষঃ ধর্মেণ হীনাঃ পশুভিঃ সমানাঃ।। -বঙ্গার্থং লিখ।
6. "ওঁ পূর্ণমদঃ পূর্ণমিদং পূর্ণাৎ পূর্ণমুদচ্যতে।
   পূর্ণস্য পূর্ণমাদায় পূর্ণমেবাবশিষ্যতে।।- কঃ অর্থঃ?
7. হিন্দুধর্মস্য মূলতত্ত্বং কুত্রাস্তি?
8. পঞ্চমহাযজ্ঞানাং নামানি লিখতু।
9. দশসংস্কারাণাং নামানি কানি?
10. ত্রিসন্ধ্যায়াঃ প্রধানাঃ দশক্রমাঃ কে?
11. নিত্য-নৈমিত্তিক-কাম্যকর্মানাং পার্থক্যং লিখ।
12. বেদমন্ত্রাণাং ভেদত্রয়ানাং নামানি লিখ।
13. "ধৃতিক্ষমাদমো২স্তেয়ং শৌচমিন্দ্রিয়নিগ্রহঃ।
    ধীর্বিদ্যা সত্যমক্রোধো দশকং ধর্মলক্ষণম্- বঙ্গানুবাদঃ করনীয়।
14. কঃ শ্রেষ্ঠঃ বিবাহঃ?
15. ধর্মস্যাষ্টবিধঃ মার্গং প্রদর্শয়তু।
16. কে দুঃখভাগিনঃ?
17. কঃ ব্রাহ্মণঃ-সপ্রমাণং লিখ।
18. একোদর-প্রসূতানাম্ একস্মিন্নপি বাসরে।
    বিবাহো নৈব কর্ত্তব্যো গর্গস্য বচনং যথা।।- অর্থঃ লিখ।
19. সাত্ত্বিকদানং কিম্?
20. দশ-মহর্ষীনাং নামানি লিখ।
21. নারীপূজায়াঃ ফলং সপ্রমাণং লিখতু।
22. পুত্রার্থীনঃ কিং কর্তব্যম্?
23. সর্বেষামপি চৈতেষাং বেদস্মৃতিবিধানতঃ।
    গৃহস্থ উচ্যতে শ্রেষ্ঠঃ স ত্রীনেতান্ বিভর্তি হি।।- অর্থঃ কঃ?
24. কতি পুরুষপর্যন্ত্যাঃ সপিণ্ডাঃ,সকুল্যাঃ,সমানোদকাঃ,গোত্রজাশ্চ?
25. উদ্বাহস্য অপরং নাম কিম্? উদ্বাহতত্ত্বম্ কেন রচিতম্?

**খ) কেবলং প্রশ্নত্রয়ম্ সমাধেয়ম্।** **৩×১০ = ৩০**

1. নিবন্ধঃ লেখনীয়-ধর্মশাস্ত্রম্।
2. প্রবন্ধঃ বিরচ্যতাম্-আধুনিক হিন্দু বিধিঃ।
3. মলমাস স্বরূপং লিখ্যতাম্।
4. শিষ্যলক্ষণং গুরুলক্ষণঞ্চ লিখতু।

**গ) অধোলিখিতশব্দৈঃ একৈকং বাক্যনির্মাণং করোতু –** **১০**

অত্র,তত্র,কুত্র,কশ্চিৎ,কেচিৎ,কাচিৎ,কাশ্চিৎ, কিঞ্চিৎ,কানিচিৎ,হ্যঃ।

**ঘ) ভ্রমসংশোধনং কুরুত:-** **৫×২ =১০**

1. গৃহস্য নিকষা উদ্যানং সন্তি।
2. রামস্য সহ সীতা বনং জগ্মতুঃ।
3. ভবতী অত্র আগচ্ছ।
4. ত্বং কিমর্থং অত্রাগচ্ছতি।
5. অহং অত্রাগত্বা পঠিতুং উপবিশামি।